उपशास्त्री-II साहित्य - तृतीय-पत्रम्
रघुवंश - द्वितीयः सर्गः

Date ___/___/___

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।

उत्तरम् - प्रसङ्गः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजादिलीपः सिंहम्प्रत्युवाच — ननु सिंह! अहमिव भवानपि पराधीनः, अहं गोरक्षणे नियुक्तश्चेत् त्वमपि देवदारुसंरक्षणे नियुक्तः इति देवदारुं यत्नेन रक्षसीति समुचितमेतत् । स्वामिनः समक्षं तदीयं वस्तु विनाश्य स्वमक्षतशरीरः सेवकः लज्जासंकोचाभ्यामभिभूतः सन् स्थातुं नैव वारयेत् । अतोऽहमिमां धेनुं विनाश्य कथं तत्पुरतो व्रजामि ।

व्याख्या:— परवान् = पराधीनः, भवानपि = श्रीमानपि, इदम् = कर्तव्य-गुरुत्वम्, अवैति = जानाति, हि = यतः, तव = भवतः, देवदारौ = देवदारुतरुरक्षणे, महान् = भूयान्, यत्नः = पर्यवेक्षणप्रयासो विज्ञायते, रक्ष्यं = रक्षणीयं पालनीयं वा वस्तु, विनाश्य = नाशयित्वा, स्वयम् = आत्मना, अक्षतेन = अव्रणेन कुशलेन वा, नियोक्तुः = नियोजकस्य स्वामिनः, अग्रे = पुरतः, स्थातुं = सान्निध्यातुं, शक्यं = साध्यम् न हि = नैव ।

Renu Devi
18/12/20

राध्या उमाकान्त सं० महावि० सुरवसेना पूर्णिया ।

Page No.

शास्त्री-II साहित्य

रघुवंश महाकाव्यम्

रघुवंशस्य त्रयोदश- चतुर्दश -सर्गयो

लघु- अतिलघुत्तरीयप्रश्नोत्तराणि —

प्र०(1) सगराश्वमेध्याश्वमपहृत्येन्द्र कुत्र बबन्ध? ?

उत्तरम् — कपिल मुनेः सविधे ।

प्र०(2) — समुद्रः कीदृशं वहिनं बिभर्ति ? उत्तरम् — अविन्धनं वह्निम्।

प्र०(3) — केन प्रकारेण समुद्रो विष्णुना साम्यं बिभर्ति ?

उत्तरम् — इयतया इदन्तया चानवधारणीयत्वात् ।

प्र०(5) — वराहेण भगवता पृथिव्या उद्धरणकाले समुद्रस्य कीदृशी शोभाऽभवत् ?

उत्तरम् — रसातलादादि भवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः अस्याच्छ~~म्भः~~ प्रलय प्रवृद्धं मुहूर्तं वक्त्राभरणं बभूव ।।

प्र०(6) — केन प्रकारेण समुद्रः अनन्य सामान्यकत्र वृत्तिः ?

उत्तरम् — मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरंगाधरदानदक्षः । अनन्य सामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः।

प्र०(7) — रघुवंशस्य त्रयोदशे सर्गे महाकविः कालिदासः कतिभिः श्लोकैः समुद्रसौन्दर्यं वर्णयामास ?

उत्तरम् — अष्टश श्लोके ।

प्र०(8) — केन प्रकारेण पुष्पकविमानस्य स्वमनोऽनुगामित्व वर्णयामास श्रीरामः ?

उत्तरम् — श्रीरामः सीतामाह —

क्वचित्पथा सञ्चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च।
यथा विधा मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्।।

Renu Devi
18/12/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री - I साहित्य - तृतीय - पत्रम्
रघुवंश - महाकाव्यम् - द्वितीयः सर्गः

प्र०(1) पद्यमिदम् व्याख्येयम् ।
इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके राज्ञो दिलीपस्य एकविंशतिदिनानि निर्विघ्नं निर्गतानि ।

व्याख्या — इत्थम् = अनेन प्रकारेण, प्रजार्थं = सन्तति प्राप्तये, महिष्या = स्व भार्यया राज्या सुदक्षिणया, समं = सार्द्धम्, व्रतम् = नियमम्, ब्रह्मचर्याधःशयनादिकं दीक्षाविशेषम्, धारयतः = दधतः, महनीयकीर्तेः = वन्दनीययशसः, दीनोद्धरणोचितस्य = निराश्रय संरक्षणप्रसक्तस्य, तस्य = राज्ञो दिलीपस्य, त्रिगुणानि सप्त = त्रिरावृत्तानि सप्त, सप्तसंख्याकानि, दिनानि = अहनानि, व्यतीयुः = व्यतीतानि ।

Renu Devi
18/12/20

राधा उमाकान्त संस्कृत महावि० सुरसेना पूर्णिया ।

Page No.

शास्त्री - I साहित्य

अभिज्ञानशाकुन्तलम्

Date ___/___/___

प्र० (1) – पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञान शाकुन्तलं नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके अत्र ऋषिः कण्वः वनस्पत्यादीन् सम्बोध्यन् कथयति ।
या शकुन्तला भवद्भ्यः वृक्षेभ्यः वनस्पत्यादिभ्यः पूर्वं जलदानं विना अर्थात् भवत् सिञ्चनं विना स्वयं जलं न गृह्णाति स्म, अलंकारप्रिया सत्यपि भवत्स्नेहकारणात् किसलयान् वा पल्लवान् न अत्रोटयत् एवं प्रथम बारं पुष्पोद्गमे सति या शिशूनां जन्म-दिवसमिव आनन्दोत्सवं सदैव आयोजितवती आसीत् । सा शकुन्तला अद्य स्वपतिगृहं गच्छति अतएव भवद्भिः सहर्षमाज्ञा प्रदेया ।

Renu devi
18/12/20

राधा उमाकान्त सं० महावि० सुरखसेना,
पूर्णिया ।